CC-0. In Public Domain. Digitization by eGangotri

अप्रैल, मई, जून २०१४ ईसवीयाब्दः ओ३म् R.N.I.Regd. No. UPBIL/1998/1485

साक्षरताऽत्र वर्णिता

-डा. रामकिशोरमिश्रः
पूर्वोपाचार्यः संस्कृतविभागाध्यक्षश्च
महामना-मालवीय-महाविद्यालयः, खेकड़ा
बागपत-२५०१०१ (उत्तरप्रदेशः)

(१)

साक्षरो यो जनो लोके धर्मग्रन्थान् पठति सः ।
यः पुस्तकं पठितुं नो शक्नोति स निरक्षरः ॥

(२)

निरक्षरस्तज्ञानाति स शृणोति यत्साक्षरात् ।
अतो रामायणं गीतां साक्षरात्कर्णयति सः ॥

(३)

एको निरक्षरो याति पत्रं गृहीत्वा साक्षरम् ।
वदति स मे पुत्रपत्रमागतं तद् वाचय ॥

(४)

साक्षरोऽब्रवीत्त्वं भद्र! स्वबाल्ये कथन्नापठः ?
पाठितोऽहं न पित्रा, पुनस्तं साक्षरोऽवदत् ॥

(५)

'माता शत्रुः पिता वैरी, येन बालो न पाठितः ।'
पञ्चतन्त्ररचयिता विष्णुशर्माऽब्रवीदिदम् ॥

(६)

किं पाठयसि पुत्रान्ते पत्रं पठितुं शक्नुयुः ।
आमहं तान् पाठयामि यत्ते भवेयुः साक्षराः ॥

(७)

पुनः कथमागतोऽसि ? साक्षरा यदि ते सुताः ।
सर्वे बहिर्गतास्तेऽतः पत्रं श्रोतुमत्राऽऽगमम् ॥

(८)

'अत्र कुशलं तत्राऽस्तु' पत्रे लिखितं श्रूयताम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दूरभाषः - ९२१९४०६०७८
९२१९४०६०७४ (ज्वालापुरम्)

तारगृहम् - महाविद्यालयः (ज्वालापुरम्)

भारतोदयः

संस्कृत - मासिकपत्रम्

वर्षम्- १०४ | अङ्कः- १०,११,१२

सम्पादकः
डॉ. हरिगोपालशास्त्री
व्याकरणाचार्यः
एम.ए., पीएच. डी.
राष्ट्रपति-पुरस्कृतः

सह - सम्पादकः
डा.केशवप्रसाद उपाध्यायः
साहित्याचार्यः
एम.ए., पीएच. डी.

प्रबन्ध - सम्पादकः
डॉ. अजयकौशिकः
साहित्याचार्यः
एम.ए., पीएच. डी.

प्रकाशकः
गुरुकुलमहाविद्यालयः ज्वालापुरम्
हरिद्वारम् - २४९४०४
(उत्तराखण्ड-प्रदेशः)

शुल्क - विवरणम्

प्रत्यङ्कम्	-	५/-
वार्षिकम्	-	५०/-
आजीवनम्	-	५००/-

विषयानुक्रणिका

१. श्रुति-सुधा	-महर्षिदयानन्दसरस्वती	०३
२. सर्वमङ्गला-शतकम्(३)	-कविरत्नम् श्रीकृष्णसेमवालः	०४
३. मनसादेवी-दर्शनम्	-डॉ. निरञ्जनमिश्रः	०७
४. भो विभो! शरणे स्वकीये नीयताम्	-स्वामी दिव्यानन्दः सरस्वती	१०
५. आचार्यहरिसिंहस्य जीवने गुणोल्लासः	-प्रो. वेदप्रकाशशास्त्री	११
६. शारद एष चन्द्रः	-डॉ. प्रशस्यमित्रशास्त्री	१४
७. महर्षिदयानन्दस्य संस्कार-विधौ नारीणां स्थितिः	-डॉ. मनुदेवबन्धुः	१५

राष्ट्रियसंस्कृतसंस्थानस्य अनुदानसाहाय्येन प्रकाशितम्

भारतोदयः(संस्कृत-मासिकम्)

(RNI Regd. No. UPBIL/1998/1485)

१. प्रकाशनस्थानम्	ज्वालापुरम्, हरिद्वारम् (उत्तराखण्डम्)
२. प्रकाशनकालावधिः	मासिकम्
३. सङ्केतेन सह मुद्रकस्य प्रकाशकस्य, सम्पादकस्य नाम, नागरिकता च	डा. हरिगोपालशास्त्री, भारतीयः
४. पत्राधिकारिणां नाम्ना सह सङ्केतः	गुरुकुलमहाविद्यालयः ज्वालापुरम् पत्रालयः- गुरुकुल काङ्गड़ी, हरिद्वारम्-२४९४०४ (उत्तराखण्डम्) ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभा, ज्वालापुरम्, पत्रालयः - गुरुकुल काङ्गड़ी हरिद्वारम्-२४९४०४ (उत्तराखण्डम्)

डा. हरिगोपालशास्त्री इति नामाहं समुद्घोषयामि यदुपरि लिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

-डॉ. हरिगोपालशास्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

भविक-भरित-भारतोदयोऽयं भव-विभवोद्भव-भावनाभिलाषी ।
भगवति भुवि भक्ति-भाव-भाजां भव-भय-भाव-भरं भ्रियान्नभूमन् ॥
निशम्यतां लेख-ललाम-सञ्चय-प्रकाशने येन कृतोऽतिनिश्चयः ।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः' ॥

वर्षम्- १०४ | वैशाखः, ज्येष्ठः, आषाढः २०७१ विक्रमाब्दः ❁ अप्रैल, मई, जून २०१४ ईसवीयाब्दः | अङ्काः-१०,११,१२

श्रुति-सुधा

ओ३म् त्वे विश्वा तविषी सध्र्यग्घिता तव राधः सोमपीथाय हर्षते ।
तव वज्रश्चिक्रिते बाह्वोर्हितो वृश्चा शत्रोरव विश्वानि वृष्ण्या ॥

-ऋग्वेदः १/१०/५१/७

पदार्थः -

(त्वे) त्वयि (विश्वा) अखिला (तविषी) बलयुक्ता सेना (सध्र्यक्) सह सेवमानम् (हिता) हितकारिणी (तव) (राधः) धनम् (सोमपीथाय) सुखकारकपदार्थभोगाय (हर्षते) हर्षति। अत्र व्यत्ययेन आत्मनेपदम्। (तव) (वज्रः) शस्त्रसमूहः (चिकिते) चिकित्सति (बाह्वोः) भुजयोः (हितः) धृतः (वृश्च) छिन्धि (शत्रोः) (अव) रक्ष (विश्वानि) सर्वाणि (वृष्ण्या) वृषभ्यो वीरेभ्यो हितानि बलानि॥७॥

भावार्थः -

यदि च श्रेष्ठेषु बलं जायेत, तर्हि सर्वेषां सुखं वर्द्धेत। यदि दुष्टेषु बलमुत्पद्येत, तर्हि सर्वेषां दुःखं वर्द्धेत। तस्माच्छ्रेष्ठानां सुखबलवृद्धिर्दुष्टानां बलहानिर्नित्यं कार्येति॥७॥

-महर्षिदयानन्दसरस्वती

[ऋग्वेदभाष्यम्, तृतीयो भागः, ९ पृष्ठे]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वमङ्गला-शतकम्(३)

-कविरत्नम् श्रीकृष्णसेमवाल
उपाध्यक्षः उत्तराखण्ड-संस्कृत-अकादम
हरिद्वारम् (उत्तराखण्डम्)

(७७)

परिध-शूल-गदासिधरे रमे,
मुकुट-राजि-विराजित-मस्तके।
अयि मृगेन्द्र-सुवाहन-संस्थिते,
त्वमव मां कमलासन-भूषिते।।

(७८)

परम-पावन-पावन-पाविनी,
विविध-वैभव-भाव-विभाविनी।
गुणवतां गुण-गौरव-वर्धिनी,
भवतु मे जननी भव-भाविनी॥

(७९)

महित-मंगल-मंगल-मंगले,
कमल-निर्मल-निर्मल-निर्मले।
जन-विनोद-विनोद-विनोदिते,
विजयसे जयदे जयदेऽजिते॥

(८०)

कनक-काञ्चन-काञ्चन-कान्तिदे,
जगति शान्ति-सुशान्ति-सुशान्तिदे।
सुधनदे धनदे धनदे हिते,
विजयसे मतिदे मतिदे शिवे॥

(८१)

जगति कोपवती महती सती,
कवलितं कुरुते सकलं हि या।
जयति सा कलि-कल्मष-नाशिनी,
कुपित-रूप-धरा किल कालिका॥

(८२)

विपदि संपतितास्त्रिदशा अपि,
शरणयन्ति तवैव पदाम्बुजे।
त्वमयि तान् ननु रक्षसि हे शिवे!,
सहृदया जननीव निरन्तरम् ॥

१. 'भक्तिरसामृतम्' इति काव्यात् साभारं प्रकाशितम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(८३)

प्रमुदितैर्मुदितैः प्रणतैः प्रियैः
तव सुतैः क्रियते सततं शुभैः।
जननि ते चरणाम्बुजयोस्तयोः,
नति-ततिः प्रणतिश्च नमस्कृतिः॥

(८४)

अयि सुधा-रस-दान-परायणे,
कुटिल-दानव-दारण-दारुणे।
नति-ततिं प्रणतिं तव पादयोः,
प्रकुरुते कुरुते कुरुते त्वयम्॥

(८५)

अतुल-शक्ति-धरा लय-कारिणी,
निखिल-शान्तिपरा शुभ-धारिणी।
विविध-भावभरा सुख-सारिणी,
विजयतां जननी भय-तारिणी॥

(८६)

अयि तव स्मरणं स्मरणं शिवे,
ननु भवार्णव-तारणके विधौ।
भवतु मे तरणिस्तरणि-प्रभे,
जननि जीवन-सार-सुसारिणी॥

(८७)

परम-भक्तिमयी शुभ-भावना,
न जननीं प्रति यस्य हृदन्तिके।
भवति तस्य निरर्थक-जीवनं,
विमल-गन्ध-हतं कुसुमं तथा ॥

(८८)

परमया रमया रमयन् मनः,
परिजहन् मनुजस्तव गौरवम्।
भुवनमेव समस्त-सुखालयं,
ननु विचिन्त्य करोत्यतिमूर्खताम्॥

(८९)

नहि बलं न धनं न कुलं गृहं,
न च सखा, न हि कोऽपि च बान्धवः।
न च मतिर्न गतिर्न रतिर्मे,
त्वमयि केवलमेव ममाम्बिके ॥

(९०)

यदपि वस्तु मदर्थमतिप्रियं,
जननि दत्तमिदं भुवने त्वया।
प्रमुदितेन हृदां परिपालय,
त्वमयि तद् विनयं विदधाम्यहम्॥

(९१)

जननि यद् भुवनेऽस्ति ममाप्यहो,
तदपि ते सकलं प्रतिभाति मे।
त्वमत एव सुनिश्चितमेव हि,
जननि तस्य भविष्यसि पालिका॥

(९२)

जगति येऽपि च वस्तुचया अहो,
विरचिताः किल ते च सदा त्वया।
जननि तैः सह ते तुलनां यदि,
प्रकुरुते कविरत्र तदज्ञता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(९३)

अतुलनीय-चरित्रवतीं शिवां,
यदि तुलामधिरोहयते कविः।
अहह तद्गुरुता प्रतियात्यहो,
सपदि भूमितले किल हीनताम्॥

(९४)

सफलता निजकर्मसु चेच्छिवे,
मिलति वा मिलतीति न मां यदि।
भवति तत्र यशोऽपयशस्तव,
यदधुनास्ति तवास्ति जनो ह्ययम्॥

(९५)

जननि मत्परिवार-परम्परां,
यदधुनात्वमिमां परिपश्यसि।
अयि दयामयि रक्ष निरन्तरम्,
सुमनसा वचसापि च कर्मणा॥

(९६)

सकलशब्दमयीं मधुरां प्रियां,
स्तुतिमिमामतिभक्तिसमन्विताम्।
प्रमुदितः प्रणतो हि जनोऽधुना,
चरणयोस्तु तवार्पयतीन्दिरे॥

(९७)

हिमगिरेर्निकटे तव सन्निधौ,
वसतिरत्र परम्परया च या।
जननि तत्र निवासपरात्मना,
विलिखितं स्तवनं हि सुतेन ते॥

(९८)

वपुरिदं परिवीक्ष्य शवात्मकं,
भयपराः प्रभवन्ति यदा निजाः।
अवनिरूपधरे सकलाश्रये,
शरणदापि तदा त्वमहो शिवे॥

(९९)

यदि मया लिखितं जगदम्बिके,
त्रुटिमयं पदमत्र किमप्यहो।
मम सुभक्ति-विलोकन-तत्परे,
ह्यवगणय्य दयस्व दयात्मिके॥

(१००)

प्रतिदिनं स्तवनस्य सुवाचनं,
प्रकुरुतेऽस्य जनो यदि भक्तितः।
सपदि तस्य समस्त-विपत्तयः,
विलयतामुपयान्ति भवेच्छिवम्॥

(१०१)

श्रीवृष्णसेमवालेन नाथोरामसुतेन वै।
शतकं रचितं रम्यं पराम्बामोदवर्धकम्॥

उत्तरप्रदेशस्य चमोली-मण्डलान्तर्गत-गुप्तकाश्याः निकटस्थ-ह्यूण(यमुनापुर) ग्राम-वास्तव्येन श्रीनाथीरामसेमवालस्य तनूजेन श्रीमहानन्दसेमवालस्यानुजनेन दिल्ली-स्थितेन कविरत्नश्रीकृष्णसेमवालेन विरचितं सर्वमङ्गला-शतकं सम्पूर्णम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनसादेवी-दर्शनम्

-डॉ: निरञ्जन मिश्रः, सह-आचार्यः साहित्यविभागे
श्रीभगवानदास-आदर्श-संस्कृतमहाविद्यालयः
हरिद्वारम्-२४९४०४ (उत्तराखण्डम्)

कदाचित् विकीर्णकामिनीकेशजालशैवालवतीं जलान्तःकम्पमानाङ्गुलि-शफरी-समन्वितां क्रीडाजलविन्दुसंवलिताधरदलकामिनीमुखकमलवतीं शीत-तोयां गङ्गां करयुगलसंयोगेन प्रणम्य चरण-स्पर्शेण बहुरूपधरत्वं शिरसि धारणेन पञ्चाननत्वं, कमण्डलौ ग्रहणेन चतुराननत्वमवाप्य क्षणान्तराल एव मानवत्वमपहाय त्रिदेवत्वं धृत्वा **'देवो भूत्वा देवं यजेत्'** इति वचनं शिरसि निधाय नातिदूरे विल्वपर्वताञ्चले समुत्तुङ्गे सघनवनाच्छन्ने वन्यजीवाकुलिते कृपा-सिञ्चिते देवीभक्तपादपवित्रिते शिखरे सर्वजनकल्याणविधायिनीं दुःखमपि हासयन्तीं रात्रावपि कमलमुखमवबोधयन्तीं सकलजनमानसकामर्पयन्तीं ऋषीणामाराध्यां वन्द्यैरपि वन्द्यां शोषिणीं तमसां, हासावलीं च सुमनसां मनसा मनसाऽर्चितुमचलम्।

मार्गे आसीन्महान् **'जय मां मनसे'**ति घोषवतामहमहमिकयाऽग्रे सञ्चरतां पूजनसामग्रीसनाथित-कराणां **'मनसां पूजय', 'तत्प्रभावात् सर्वं लभस्व', 'नारिकेलं गृहाण', 'रक्ताञ्चलं गृहाण', 'कृत्स्नां सामग्रीं गृहाण'** इति घोषं कुर्वतां विक्रेतृणां मूल्यावमूल्यावधानाय विवदमानानां क्रेतृणामाबालवृद्धानां गमनागमनश्रमापनोदनाय गमनश्रमवतां मनसा-पदकमलस्पर्शेण हत्कमलहासविकासमाकलयतां भक्तिभाव-भरित-प्राङ्गणे सौजन्य-विनाशिनीं लक्ष्मीं नर्तयतां सम्मर्दः।

सम्मर्दो भक्तिमार्गे भक्तिभावना-सम्वर्धयति, हृद्-बलं पोषयति, श्रममपनोदयति, कुण्ठतां शोषयति, दिशति प्रसादं हरति विषादं, रक्षति सह्हभावं, जनयति मैत्रीं, वितरति ज्ञानं, परिहरति मानं, शिक्षयति दानं, प्रेरयति गानं, दर्शयति पुरातनं भारतम्। सम्मर्दस्याङ्गो भूत्वा दीनानां याचकानामुदरनिहीनदेहयष्टिं पश्यन् विक्रेतृभिर्विवदमानो गमनागमन-प्रवृत्तवाहनेभ्यः स्वशरीर-रक्षां विदधत् पार्श्वस्थिताट्टालिकानामलौकिकं शोभां निरूपयन् तुन्दिलानां श्रेष्ठीनां विलासमाकलयन् लघुमतिक्रम्य तत्र स्थितोऽभवं यत्र देवमन्दिरमासादयितुं मार्गद्वयसङ्गम आसीत्।

एकतो भौतिकसुखमास्वादयन् वैज्ञानिकचमत्कारमालोकयन् रज्जुमार्गेण गमनाय तत्पराणां कोलाहलः, अपरतश्च शान्तभावेन देवीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्मरतां शारीरिकसुखमगणयतां पद्भ्यां प्रचलतां प्रतिपदं मनसा मनसां स्मरतां शान्तवीथिरासीत्।

उभयोर्मार्गयोः प्रचलतां मानसिकविचारमाकलय्य समुत्पन्नो मम मनसि कोऽप्यनुत्थितभावः। देवीपादपद्मावलोकनसुखास्वादात् शारीरिकासामर्थ्यवशात् पराङ्मुखानामिच्छा-पूर्त्यर्थं वैज्ञानिकोपकरणलाभोऽयमस्ति वरदानस्वरूपः, परञ्चात्र स्वस्थशरीराणां समयाभावात् लक्ष्मीविलासात् स्वोत्कर्षप्रकर्षप्रदर्शनलोलुपता-वशाद् वाऽस्य प्रयोगो न रोचते। उपकरणमिदमावश्यकतामपहाय याति विलासिताम्। विलास-वञ्चाहता भवत्यावश्यकता। त्रिभुवनभरणपोषण-समर्थायाः पुरतो वैभव-प्रदर्शनेन किम्? स्वाभिमानमदमर्दनायालौकिकप्रभावपूर्ण-पादावलोकनं भवति पुनस्तत्र तत्प्रदर्शनेन किम्? योगमार्गे भोगविलासप्रदर्शनं कथम्? आवश्यकता विलासितामागत्य विनाशोन्मुखी भवति। प्रकृतिरमणीयशोभाऽवलोकनेन मनसो मलापसारणं भवति, परञ्चात्रापि कथं मलाधानेन तुष्टिमाधातुं सम्मताः दृश्यन्ते जनाः। स एव भवति वञ्चितो यदर्थमस्याविष्करणम्। अलौकिककृपाविभाभासितेऽपि मनसि कथं समयाभावपरिज्ञानम्?

यस्य स्मरणमात्रेण सर्वाभावो विनश्यति।
तन्मार्गेऽपि कलौ पश्य कालाभावः प्रवर्तते॥

जीवन्तु ते सुकृतिनः येऽत्रापि स्वसौविध्यमेव पश्यन्तः दीनान् विकलान् स्थूलान् तुन्दिलान् रुग्णान् वृद्धानगणयन्तः लक्ष्मीविलासवश रज्जुमार्गसुखमनुभवन्ति।

मनसि मनसामाधाय पद्भ्य गमनमारब्धवानहम्। दिव्यप्रासादयुगलमध्यगतरथ्या नातिदूरं यावत् रमणीयसोपानमार्गमतिक्रा घनवनविहरणकुशलं राजमार्गमिव प्राकृतिक-म गमनागमनव्यग्रभक्तजनाकुलितं चञ्चलैर्बालैश्चञ्चल चारुनेत्राभिः कामिनीभिः मन्दगामिनीभिर्मानिनीभि लगुडसाहाय्यमाचरद्भिर्वृद्धैः प्रथमदर्शन लोभपरवशैर्धावद्भिस्तरुणैः मध्ये मध श्रान्तिमपसारयितुमुपविष्टैः सुजनै बालतोषणकुशलविक्रेतृभिर्लघुखाद्यपेयपूरितै चलापणैर्मध्ये मध्ये भीतिमुत्पादयद्भिर्लम्बलाङ्गूल कृष्णमुखैर्लङ्गूराख्यैः कपिकुलैर्व्यस गमनागमनव्यग्रपथिकत्यक्तवृक्षाच्छादितं वायुवेगवशा निपतितशुष्कपत्राच्छादिततलं देवीगमनोचितमार्ग अवाप्नुवम्।

मार्गेऽस्मिन् लङ्गूर-भयभीताः शिशव मातुरञ्चले विलीनाः सन्तः शनैः शनैः सरन्ति दण्डमादाय मार्गमागम्यमानान् कपीनपसारयन्त युवानः, हनूमतोऽवतारं मत्वा तान् प्रणमन्तो वृद्धाः केचन चणकं वितीर्य तान् भोजयन्तो भक्ताः, केच स्वमुखविकृत्या तानुद्वेजयन्तो चञ्चलबालकाः, केच तानपि भावयन्तो दुष्टाः, कष्टसाध्यं मार्गमतिक्रामनि लीलया। एते लङ्गूराख्यकपयः कूर्दन्ति शाखा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धावन्ति मार्गे लुञ्चन्ति खाद्यवस्तूनि पथिकहस्तात्, भाययन्ति किलकिलालापेन लोकान् अवरोधयन्ति मार्गं लम्बलाङ्गूलविस्तारेण। मन्ये श्रेयो मार्गे विघ्नभूतास्ते सञ्चरन्ति।

(१)

स्वयं तिष्ठति शाखायां, पुच्छश्चुम्बति भूतलम्।
शाखामाश्रित्य लम्बन्ते, यथा सर्पाः भयङ्कराः ॥

(२)

सर्पो यदा सर्पति शुष्कपत्रे,
शाखा-मृगास्तत्र पतन्ति शीघ्रम्।
क्रोडेऽपि मातुश्शवस्तदीयाञ्चले,
निलीना भवितुं सयत्नाः ॥

(३)

काचित् स्वमातुः पदलाभलोभात्,
स्वस्वास्थ्य-लाभाय तथा च केचित्।
ब्रह्माण्डमातुश्शरणं प्रयान्ति,
ह्यासक्तिपृष्ठेऽस्त्यधुना विरक्तिः ॥

काननाङ्गने सर्पन्तं सर्पमिव मार्गमतिक्रामन् मध्ये मध्ये सुरभितशिलायामुपविशन्, यात्रिविश्रामस्थलमालोकयन् रज्जुमार्गेण गच्छतां निराधारतां विचारयन् उत्तुङ्गवृक्षशिखरमालिङ्गतां घनानां धार्ष्ट्यं पश्यन् विविधभावभरितान्तःकरणानां चारित्र्यमालोचयन् स्ववस्तुविक्रयणतत्पराणां वाग्जालं विनिन्दन् स्थानावकाशादधिकजनपरिपूरितं मातुर्जयघोषगुञ्जितसर्वविधभौतिकसुखसम्बलितं परमपवित्रं मनसा देव्याश्चिरकालादभिलषित-प्राङ्गणमवाप्नुवम्।

तत्र मार्गश्रान्तिमपाकर्तुं कृत्रिमशीतलजलधारा करोति पाद-प्रक्षालनम्, मन्ये जडोऽपि भक्तजनपदधूलिमादाय मनोमालिन्यमपहर्तुमिच्छति मुक्ता-प्रवालरजतादिधातुनिर्मितवस्तूनां पण्यवीथिराहरति नेत्राणि समागतानां, धार्मिक-ग्रन्थापणानि प्रकाशयन्त्यन्तर्विलसितार्थान्, लौहनिर्मित-पङ्क्तिबद्धाः शृङ्खलाः समयाभावादग्रे गन्तुं बलात् प्रयतमानान् नियन्त्रयति। शुद्धवेषधारिणो विप्राः भौतिकविलासमपहायाध्यात्मिकविलासानन्दमालोकयति।

भौतिकताण्डवं पददलितं कुर्वत् शान्तिभावमालिङ्गत् अन्तःप्रकाशमुज्ज्वालयत् परमानन्दसन्दोहं प्रदर्शयदलौकिकाभां प्रसारयत् दैन्यं प्रताडयत् समृद्धिमपसारयत् **'संगच्छध्वं संवदध्वम्'** इति पाठं व्यावहारिक-रूपेण पाठयत् प्राङ्गणमिदं सांसारिकतापदग्धानुज्जीवयतीव भाति।

ततस्त्रिभुवनतोषण-दक्षां त्रितयतापहरण-रतां शिखरान्तःस्थां ब्रह्मणो मानसिक-तनयस्य तपोमूर्तेः ज्ञानोदधे जरत्कारोर्धर्मपत्नीमहिमातरं कदाचित् सघनकान्तारगतविशालबाहुभिरारक्षितवनस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूर्यकरावरोधकरस्य स्नूहीवृक्षस्याधस्तात् निजकुलगौरवमाकाङ्क्षद्भिः प्रतिपद-पद्म-पराग मधुकरीभिः लोकलोचनचन्द्रिकाभिः अमरपादानुगन्त्रीमुपहसन्तीभिः सकलसौभाग्यम् आकलयन्तीभिः, लौकिकानन्दसम्पत् तृणमिवालोकयद्भिः, स्वजीवनार्पणेनापि भर्तुरानन्दमाहरन्तीभिः वनिताभिः। लौकिकाचार-परम्परया कर्पटबद्धभूषणस्य स्नूहीवृक्षस्य मूले पूजितां त्रिभुजामष्टनागासनोपविष्टामिदानीं भव्यमन्दिरान्तःस्थां दर्शनमात्रेणानन्तकोटिफलदां गिरिशिखरगतामप्यानन्द-सिन्धुनिमज्जितां नागासनोपविष्टामपि सकललोकचेतसि कृताधिकारां मानसिक-तोषं प्रसारयन्तीं मनसा-देवीमपश्यम्।

देवीपददर्शनाप्तफलो विगतमलः अनिर्वाच्यानन्दमास्वादयन् भूमौ चलन्नप्यम्बरमिवानुभवन् सांसारिकसुखम् अगणयन्नलौकिकानन्दसागरे विचरन् बाह्यजगदपहायात्मावलोकनयोग्यतामादाय सोपान-मार्गेण पुनः पूर्वोक्तरथ्यामागत्य सांसारिकोऽभवम्।

ज्ञात्वाऽपि सर्वं भवतीह मूर्खः,
लब्ध्वाऽपि सर्वं सततं दरिद्रः ।
स्वर्गस्य सौख्यं नरकस्य दैन्यं,
विचार-चक्रेण जनाः लभन्ते।।

नैष्ठिकस्य प्रार्थना

भो विभो! शरणे स्वकीये नीयताम्

स्वामी दिव्यानन्दः सरस्व

परमाध्यक्षः, पातञ्जल-योगधाम-आश्रम

आर्यनमगरम्, ज्वालापुरम् (हरिद्वारम्

भो विभो! शरणे स्वकीये नीयताम्।
बौद्धिकं विपुलं बलं मे दीयताम्।। ध्रुवम् ।।
पूर्वजैः ऋषिभिर्धृता या योगिभिः,
याचिता पितृभिर्व्रतीन्द्रैः साधकैः ।
ज्ञानदां सुखदां सुमेधां धीयताम् ।।१।। भो विभो...
पाठिताः पठिताः सुपाठाः पाठकैः,
बोधिताः विविधैर्बुधैर्ये बोधकाः ।
वैदिकाः विषयाः मतौ मे स्थीयताम्।।२।। भो विभो...
मातरं पितरं गुरून् वन्दे मुदा,
सेवकैः सह सम्मिलेयं सर्वदा ।
द्वेषकान् सकलान् विचारान् हीयताम् ।।३।। भो विभो...
शौर्यदं सकलान् विचारान् हीयताम्,
धैर्यदं दमदं भवेन्मे मानसम् ।
क्रोधजान् भयदान् विभावान् पूयताम् ।।४।। भो विभो...
आत्मदो बलदस्त्वमेव श्रूयते,
श्रेयदो धनदस्त्वमेव पूज्यते ।
नैष्ठिकं व्रतसाधनं मे पूर्यताम् ।।५।। भो विभो...
सेवको दुःखिनां भवेयं जीवने,
नैतिकं चरितं चरेयं यौवने ।
तादृशीं नवदिव्यताम्- आधीयताम् ।।६।। भो विभो...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचार्यहरिसिंहस्य जीवने गुणोल्लासः

महामहोपाध्यायः प्रो. वेदप्रकाशशास्त्री
पूर्वाचार्यः उपकुलपतिश्च
गुरुकुल-काङ्गड़ी-विश्वविद्यालयः
हरिद्वारम् (उत्तराखण्डम्)

मानवयोनिरेवैषा योनिर्विद्यते, या गुणवत्तया निखिलं मानवेतरं योनिनिचयं न्यक्करोति। मानवानां भौतिकमाध्यात्मिकं चोभयविधमभ्युदयमभिलक्ष्यैव परमात्मना चत्वारो वेदाः सृष्टेरादौ चतुर्णामृषीणां हृद्गुहासु प्रकाशिताः। वेदज्ञानमवाप्यैव सुकृतं वितन्वानाः सत्पुरुषाः सुखमयं मोक्षमवापुः। मानवयोनेरुत्कृष्टतां वदति खलु मनुस्मृतौ प्रथमः स्मृतिकारः -

भूतानां प्राणिनः श्रेष्ठाः, प्राणिनां बुद्धि-जीविनः।
बुद्धिमत्सु नराः श्रेष्ठाः, नरेषु ब्राह्मणाः स्मृताः।।

येन पुरुषेण मानव-जनिं लब्ध्वा विद्यार्जनं कृतं, तेन स्वजीवनं तु सफलीकृतमेव, परेषामपि जीवनं विद्या-दानेन समुन्नतिम्। सफलीकृत-जीवनानां पुरुषाणां मध्ये विराजते खलु आचार्यहरिसिंहः।

आचार्यहरिसिंहस्य जीवनं येन दृष्टं, येन तद्विषये श्रुतं, येन तेन सह वार्ता कृता, तेन आचार्यस्य जीवने गुणवत्ता विलोकिता।

आचार्यहरिसिंहं समुद्दिश्य यदि क्रियेत् विचारस्तदा अवश्यमेव वक्तुं शक्यते यद् तत्र प्रायो विलोक्यते गुणोत्कर्षः। ये गुणास्तेषां जीवने चकासति तेषां प्रवदनं क्रियते।

प्रथमो गुणस्तत्र ज्ञानानुरागिता-

ज्ञानार्जने ते सहजतयैव निरालसाः सन्ति। एका सूक्तिर्विद्यते यद् **'बालादपि सुभाषितं ग्राह्यम्।'** जनैर्दृष्टं यद् अध्यापन-काले यदि केनापि छात्रेणोचितं कथनं कृतं तत् कथनं निर्विलम्बतया निरभिमानतया स्वीकृत्य छात्रोत्साहस्तेनाचार्येण संवर्धितः। श्रेष्ठं विषयवस्तु प्रायशः पाठयितुं प्राध्यापकाभ्यासं कुर्वन्ति, परं ये विशिष्टाः प्राध्यापकाः भवन्ति, ते तु पाठ्यान्तरमपि विषयजातं पठन्ति स्वज्ञानाभिवर्धनाय। एवंविधा प्राध्यापका एव भवन्ति आचार्यपदभाजः सम्मानार्हाश्च। तेष्वैव विशिष्टेषु विद्वत्सु सम्मान-पुरस्सरं आचाय-हरिसिंहस्य नाम गृह्यते।

द्वितीयो गुणो विद्यते कुलीनता -

सज्जनानां एष स्वभावो वर्तते यद् यत्कुलं ते स्वजन्मना अलंकुर्वन्ति, तत्कुलपरम्परा अपि तैः परिपाल्यते। क्रीडा-काले, प्रहसनकाले, भाषणकाले, गमनकाले, व्यवहारकाले ते कुलोत्कृष्टपुरुषसन्दिष्टां निर्दिष्टां कुलपरम्परां न परित्यजन्ति, कुलक्रमागताः संस्कारास्तान् विशिष्टं स्थानं प्रयच्छन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचार्यहरिसिंहस्य जन्म प्रतिष्ठिते कुले जातम्। तस्य कुलस्य या भावना संस्कारवत्ता, गुणवत्ता, शीलवत्ता, शालीनता चासीत्, सा निर्विकल्पतया आचार्यजीवनं विभूषयति। ये स्वगुणवत्तया कुलपूर्वजानां नाम प्रसारयन्तः सम्वर्धयन्ति यशस्त एव जनाः धन्याः। अतएव केनापि विदुषा यन्निगदितं तद् अद्यापि स्मर्यते पठ्यते प्रोच्यते च-

परिवर्तिनि संसारे मृतः को वा न जायते।
स जातो येन जातेन याति वंशः समुन्नतिम्।।

श्रीमता पं. हरिसिंहेन कुलेन सह स्वात्मख्यातिमपि प्रकाशयितुं स्वगृहपदे कणाद-विद्यापीठस्य संस्थापना कृता। तत्रैव शिक्षा-प्रसाराय प्रदानाय च विद्यालयोऽपि संस्थापितः, यत्र जनपदवासिनां बालकाः शिक्षामाधिगच्छन्ति, भवन्ति च संस्कारवन्तः।

तृतीयो गुणः जितेन्द्रियता(दमः) -

इन्द्रियाणां योऽप्यधिष्ठाता, स एव जितेन्द्रियः। भारतीय-मानवपरम्परायां प्रायशः इन्द्रियानिग्रहविषये पदे-पदे सरलानि परममहत्त्वपूर्णानि वाक्यजातानि विद्यन्ते। यानि वाक्यानि महर्षिणामनुभवभूतानि भान्ति। यस्य महापुरुषस्य ख्यातिर्विद्यते, तत्र प्रख्यातिमूले न धनवत्ता नापि विद्वत्ता नापि बलवत्ता विद्यते, विद्यते तत्र जितेन्द्रियता। येनेन्द्रियदमने प्रभुत्वमात्रं तेनैव सर्वे शत्रुमित्रोदासीनबन्धुबान्धवाः निर्जिताः। आचार्यहरिसिंस्य जीवने जितेन्द्रियतायाः वैशिष्ट्यं विद्यते। प्रायशः संसारे विलोक्यते यद् दिवङ्गतायां सहधर्मचारिण्यां पुरुष अल्पकालमतीत्य अपरां सहधर्मचारिणीमन्वेष्टुं भवति प्रयतमानः। परमाश्चर्यकरमिदं विद्यते यत् पं. हरिसिंहेन युवाकालेऽपि दैवदुर्विपाकवशाद् प्रभोरिच्छा बलवतीति मत्वानेन यथा तथापि समासादित-भार्या-वियोगेनापि कदापि द्वितीयविवाहसंरचना मनसि न कृता। पुनश्चेदमतोऽपि विस्मयकरं विद्यते यत् सकलमपि जीवनं तस्य आचार्यस्य निरपवादं निःसन्दिग्धं निर्किल्विषं, निरपराधं चाद्यापि विद्यते। ते धन्याः खलु येषां जीवने जितेन्द्रियता विराजते।

चतुर्थो गुणः श्रुतानुरागिता -

ये जनाः श्रवणे रुचिमातन्वन्ति, त एव जना भवन्ति मननशीलाः। यतोहि **'मननादेव मनुष्यो भवति।'** मत्वा यः कर्माणि करोति, स एव मनुष्यः। उपनिषत्साहित्ये कथ्यते यत् **'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।'** मधुर-श्रवणेन, मधुर श्रावणेन च मनसि स्थिरत्वमुपपद्यते। महर्षिणा देवदयानन्देन वेदानां पठनं पाठनं श्रवणं श्रावणञ्च आर्याणां परमधर्मत्वेन स्वीकृतम्। ये जनाः वेदान् पठन्ति, पाठयन्ति ते खलु महतां श्रेणीम् आश्रित्य भवन्ति सत्करणीयाः। पं. हरिसिंहमहोदयेन स्वगुरुमुखात् वेदविद्या न सकृत् अपितु असकृत् श्रुता। अविरलतया श्रुता विद्या पुरुषं विद्यावन्तं करोति। काव्यशास्त्रस्याचार्येण कथितं यत्-

'श्रुतेन यत्नेन च वाग् उपासिता
ध्रुवं करोत्येव कमप्यनुग्रहम्।'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पण्डित-हरिसिंहस्य जीवने या या विद्या समुल्लसन्ति तासामुन्मेषे श्रुति श्रुताभ्यास एव।

पञ्चमो गुणः पराक्रमोत्सुकता –

समायाते पराक्रम-काले पराक्रमप्रदर्शनमनिवार्यमेव पराक्रमशीलं जनं जनाः कामयन्ते। मानवानां सकलं जीवनं अनुशासनवर्ति विद्यते। अनुशासनपालनपद्धतौ पराक्रमापेक्षा विद्यते। पराक्रम-प्रियः पुरुष अनुशासस्यानुशासकपरम्परां सम्यग् जानाति तथा पालयत्यपि। यो जनः पराक्रमयुक्तो भवति, स एव आचार्यपदमवाप्य पराक्रमेणात्मगौरवं प्रकटयन् अनायासेनैव शुद्धम् अनुशासनं करोति। पं. हरिसिंहस्याचार्यकालस्तस्य पराक्रमशीलताम् अनुशासनप्रियताञ्च अभिवदति।

षष्ठो गुणो भवति बहुभाषिता –

बहुभाषितेयं प्रगल्भपदवाच्या भवति, येषां वाचि प्रगल्भता विराजते, ते भवन्ति वाग्वीराः। वाक्शूरः स्ववाक्प्रभावेण सर्वान् वशीकर्तुमर्हति। यः प्राध्यापकः स्वछात्रान् स्ववाचो बहुभिः प्रकारैः पाठयति, स एव प्रबुद्धः कुशलो विद्याविषयपारङ्गतश्च भवति। पं. हरिसिंहमहोदये वाक् प्रगल्भत्वमाभासते, कुशलशिक्षकेषु प्रथमगणनायां तेषां नाम स्मर्यते। निजाध्यापनकाले येऽपि छात्राः पाठिताः, तेषां छात्राणां हृदि सम्प्रत्यपि कुशलाचार्यस्य पं. हरिसिंहस्य शुद्धा पूताच्छवि विद्यते। शङ्का-निरासाय यदि कश्चिद् छात्र अध्यापनवेलाम् अतिक्रम्यापि स्वाचार्यम् उपयातस्तर्हि तदैव आचार्येण निरालसतया तत्कल्याणभावं प्रकाशयन्त्यादृशा निरीक्ष्य तत्शङ्का सहजतया निराकृता।

सप्तमो गुणः यथाशक्ति दानभाव –

लोके यो दानं दत्त्वा अवशिष्टं भुञ्जते, स महान् भवति। यज्ञाग्नौ यथा कालं हव्यं हुत्त्वा यज्ञशिष्टं अश्नन् अमृतभुक् जायते। धर्मग्रन्थेषु वेदेषु ऋषि-प्रणीतेषु ग्रन्थेषु पदे-पदे दान-महिमा श्रूयते। यस्य पार्श्वे यद्धनं विद्यते तद्देयं बुद्धिमता। विद्याधनं, पशुधनं स्वर्णरजतादिधनं यस्य पार्श्वे भवति, स एव धनवान् भवति। तत्रापि विद्या-दानस्य सर्वत्र प्रशंसनं विद्यते। विद्या-धनं यथा यथा दीयते, तथा-तथा वर्धते। आचार्यः सर्वदा सर्वथा विद्या-दानं कृत्वा तद् अभिवर्धनं करोति। पं. हरिसिंहेन कदापि विद्या-दाने कार्पण्यदोषलवोऽपि न दृष्टः।

कृतज्ञता भावोऽष्टमो गुणः –

लोके कृतज्ञानां जीवनमुत्तरोत्तरं यशसा सह परिवर्धते। अन्य-गुणापेक्षया कृतज्ञता गुणो वरीयान् भवति, येन कृतज्ञता न परित्यक्ता, तेन सपद्येव सर्वं अधिगतम्। आचार्य-प्रवरेण स्वकुलवरिष्ठान् प्रति ज्येष्ठान् प्रति स्वगुरून् प्रति पार्श्ववर्तिनं प्रति मित्रवर्गं प्रति सर्वदा कृतज्ञता ज्ञापिता। संक्षेपेण वक्तुं शक्यते यद् आचार्य पं. हरिसिंहमहोदयस्य जीवने ये ये गुणाः प्रख्याताः, ते गुणाः युगपद् अलङ्कुर्वन्ति। ये गुणाः पुरुषजीवने दीपकाः कथ्यन्ते, ते सर्वे गुणाः प्रलसन्ति। स्वभावात् सर्वेषां विदुषां मनसि भावनेयं उद्भवति यद् आचार्यप्रवरः पूर्णस्वास्थ्येन यशसा सह शतोत्तरं आयुर्लभताम् इति।

'यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा
नकिः स दभ्यते जनः।।'

इत्यलम्।

विशेषः – 'भारतीय संस्कृति के पुरोधा : आचार्य हरिसिंह त्यागी (स्मृति) ग्रन्थात् साभारं प्रकाशितम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शारद एष चन्द्रः

–डॉ. प्रशस्यमित्रशास्त्री
पूर्वसंस्कृतविभागाध्यक्षः
फीरोज–गाँधी–स्नातकोत्तर–कालेजः,
रायबरेली(उ.प्र.)

(१)

आद्यो महाकविरसौ भुवने प्रसिद्धः ,
काव्येन नायकतमं परिकीर्त्य रामम् ।
विस्मृत्य भूतमथ पश्य भविष्यमेव ,
वाल्मीकिमिङ्गयति शारद एष चन्द्रः ॥

(२)

पूर्वार्द्ध–जन्म–कृत–कार्य–कलङ्करूपम्,
अङ्के निगूह्य खग–शोक–दया–समुत्थम् ।
वाल्मीकि–काव्य–रसधार–सुधा–स्वरूपम्,
ज्योतिर्ददाति भुवि शारद एष चन्द्रः ॥

(३)

तातस्य जीर्ण–वपुषोऽपि मनोविलोमम्,
आदेशमत्र तु निशम्य वने गतार्थम् ।
हृष्टं शुभाननममुष्य तथैव दीप्तम् ,
रामस्य भासयति शारद एष चन्द्रः ॥

(४)

यः काञ्चनस्तु हरिणो विपिने विलुप्तः ,
दृष्टः पुनश्च न कदाचिदहो! पृथिव्याम्।
अङ्के ममैव शरणं समवाप्य गूढः,
रामं विनोदयति शारद एष चन्द्रः ॥

(५)

आतङ्कवाद–भरिता नव–रावणास्ते,
भूमौ चरन्ति बहवः सततं निगूढाः।
आतङ्क–पङ्कमिह नाशय मातुरङ्कात्,
रामं निवेदयति शारद एष चन्द्रः ॥

(६)

शान्तं शिवं सुरभितं भुवि भारतं यत्,
सन्मार्ग–दर्शकमिदं यदि मण्डलं मे ।
'पाकः' कलङ्क इव सन्निहितो ममाङ्के,
इत्थं विभासयति शारद एष चन्द्रः ॥

(७)

वस्त्रं नवीन–धवलं परिधाय देहे,
नेता सुगोप्य हृदि रक्षति कालिमानम्।
तं चाऽपि मादृशमवेहि कलङ्कपूर्णम्,
सङ्केतयन् हसति शारद एष चन्द्रः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महर्षिदयानन्दस्य संस्कारविधौ नारीणां स्थितिः

-डॉ. मनुदेवबन्धुः
आचार्यो(प्रोफेसर) वेदविभागे
गुरुकुल काङ्गड़ी विश्वविद्यालयः (हरिद्वारम्)

प्रस्तावना-

आर्यसमाजस्य संस्थापकः महर्षिदयानन्दः वेदोद्धारकः, राष्ट्रभक्तः, आर्यजातिसमुद्धारकः, संस्कृतभाषायाः प्रबलपोषकः, कुरीतिनिवारकः, पाखण्डखण्डकः, वेदभाष्यकारकः, नारीणां कल्याणकारकश्चासीत्। यत्र महर्षिदयानन्दः वेदभाष्यं कृतवान्, तत्रैव सत्यार्थप्रकाश-ऋग्वेदादिभाष्यभूमिका-संस्कारविधि-आर्याभिविनय-वर्णोच्चारणशिक्षा-व्यवहारभानु-गोकरुणानिधि-पञ्चमहायज्ञविधि-आदीनां ग्रन्थानां प्रणेतापि आसीत्। वेदस्य माहात्म्यं व्याकुर्वन् दयानन्दो लिखति-

'वेद सब सत्य विद्याओं का पुस्तक है। वेद का पढ़ना-पढ़ाना और सुनना-सुनाना सब आर्यों का परमधर्म[1] है।'

अमर-ग्रन्थे सत्यार्थप्रकाशे मातृगुणान् व्याख्यापयन् दयानन्दो लिखति- **'मातृमान् पितृमान् आचार्यवान् पुरुषो वेद।'** यह शतपथ ब्राह्मण का वचन है। वस्तुतः जब तीन उत्तम शिक्षक अर्थात् एक माता, दूसरा पिता और तीसरा आचार्य होवे, तभी मनुष्य ज्ञानवान् होता है। वह कुल धन्य! वह सन्तान बड़ा भाग्यवान्! जिसके माता और पिता धार्मिक विद्वान् हों। जितना माता से सन्तानों को उपदेश और उपकार पहुँचता है, उतना किसी से नहीं। जैसे माता सन्तानों पर प्रेम, उनका हित करना चाहती है, उतना अन्य कोई नहीं करता। इसीलिए (मातृमान्) अर्थात् **'प्रशस्ता धार्मिकी विदुषी माता विद्यते यस्य स मातृमान्।'** धन्य वह माता है कि जो गर्भाधान से लेकर जब तक पूरी विद्या न हो तब तक सुशीलता का उपदेश[2] करे।'

गर्भाधानसंस्कारप्रसंगे-

संस्कारविधेः गर्भाधानसंस्कारप्रसंगे नारीणां महिमानं विशिनष्टि दयानन्दः - 'गर्भाधान उसको कहते हैं कि जो - **'गर्भस्याधानं वीर्यस्थापनं स्थिरीकरणं यस्मिन् येन वा कर्मणा तद् गर्भाधानम्।'** गर्भ का धारण अर्थात् वीर्य का स्थापन, गर्भाशय में स्थिर करना जिस क्रिया से होता है, उसी को गर्भाधान संस्कार कहते हैं। जैसे बीज और क्षेत्र के उत्तम होने से

---

१. आर्यसमाजस्य तृतीयनियमः

२. सत्यार्थप्रकाश, द्वितीयसमुल्लासः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्नादि पदार्थ भी उत्तम होते हैं, वैसे उत्तम बलवान् स्त्री-पुरुषों से सन्तान भी उत्तम होते हैं। इससे पूर्ण युवावस्था यथावत् ब्रह्मचर्य का पालन और विद्याभ्यास करके अर्थात् न्यून से न्यून सोलह वर्ष की कन्या और पच्चीस वर्ष का पुरुष अवश्य हो और इससे अधिक वय वाले होने से अधिक उत्तमता होती है। क्योंकि बिना सोलहवें वर्ष के गर्भाशय में बालक के शरीर को यथावत् बढ़ने के लिए अवकाश उपयुक्त और स्त्री के शरीर में गर्भ के धारण-पोषण का सामर्थ्य भी नहीं होता और पच्चीस वर्ष के विना पुरुष का वीर्य भी उत्तम नहीं होता[३]।'

पुंसवनसंस्कारप्रसंगे -

महर्षिदयानन्दः पुंसवनसंस्कारप्रसंगे नारीणामारोग्यं स्वास्थ्यं सुसमीचीनं भवेत्, भोजनादिकं बलकारि भवेदिति प्रदर्शयन् लिखति- 'इसके पश्चात् स्त्री सुनियम युक्ताहार विहार करे। विशेषकर गिलोय, ब्राह्मी ओषधी और सूंठ (शुण्ठी) को दूध के साथ थोड़ी-थोड़ी खाया करे और अधिक शयन और अधिक भाषण, अधिक खारा, खट्टा, तीखा, कड़वा, रेचक, हरड आदि न खावे, सूक्ष्म आहार करे। क्रोध, द्वेष, लोभादि दोषों में न फंसे, चित्त को सदा प्रसन्न रखे, इत्यादि शुभाचरण[४] करे।'

सीमन्तोन्नयनसंस्कारप्रसंगे-

सीमन्तोन्नयनसंस्कारः पूर्णरूपेण गर्भिणी-स्त्रीण कल्याणाय क्रियते। दयानन्दो लिखति- 'अब तीसर संस्कार सीमन्तोन्नयन कहते हैं, जिससे गर्भिणी स्त्री क मन सन्तुष्ट, आरोग्य, गर्भस्थिर, उत्कृष्ट होवे और प्रतिदि बढ़ता[५] जावे।'

विष्णोः श्रेष्ठेन रूपेणास्यां नार्यां गवीन्यायाम् ।
पुमांसं पुत्रानाधेहि दशमे मासि सूतवे[६] स्वाहा ॥

विष्णोः सर्वव्यापकस्य परमेश्वरस्य श्रेष्ठेन रूपेण सौन्दर्यपूर्णरूपेण अस्यां गवीन्यां गोसदृश्यां नार्यां पुमांसं बलवन्तं रोग-रहितं पुत्रम् आधेहि। हे विष्णो! दशमे मासे इमां नारीं मदीयां पत्नीं सर्वगुणसम्पन्नस्य सन्तानस्य जननीं निर्मापय। अग्रे लिखति दयानन्दः- **'किं पश्यसि? प्रजां पश्यामि।'** येन-केन प्रकारेण प्रजा भवेदेव। सीमन्तोन्नयन-संस्कारस्य समापन-प्रसंगे महर्षिदयानन्दो लिखति-

'तत्पश्चात् एकान्त में वृद्ध कुलीन और सौभाग्यवती, पुत्रवती गर्भिणी अपने कुल की और ब्राह्मणों की स्त्रियाँ बैठें, प्रसन्न वदन और प्रसन्नता की बातें करें और वह गर्भिणी स्त्री उस खिचड़ी को खावे और वे वृद्ध समीप बैठी हुई उत्तम स्त्री लोग आशीर्वाद[७] देवें।'

---

३. संस्कारविधिः, गर्भाधानप्रकरणम्।
४. संस्कारविधिः, पुंसवनप्रकरणम् ।
५. संस्कारविधिः, सीमन्तोन्नयनप्रकरणस्य प्रारम्भे एव ।
६. आश्वलायनगृह्यसूत्रम् १.१४.३
७. संस्कारविधिः, सीमन्तोन्नयनप्रकरणस्य समाप्तौ ।
८. गोभीलीयगृह्यसूत्रम् २.७.१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओ३म् वीरसूस्त्वं भव, जीवसूस्त्वं भव, जीवपत्नी[९] त्वं भव।

हे नारि! त्वं वीरपुत्राणामुत्पादयित्री भव। हे स्त्रि! त्वं जीवनशीलानामायुष्यमतां सन्तानानां जननी भव। हे पत्नि! त्वं जीवनशीलस्यायुष्मतः पत्युः पत्नी भव। त्वमेव समस्तपरिवारस्य कल्याणकर्त्री असि। त्वमेव सम्पूर्ण-परिवारस्य पालयित्री असि। त्वमेव अन्नपूर्णा असि।

जातकर्मसंस्कारप्रसंगे-

जातकर्मसंस्कारः जातस्य जन्मप्राप्तस्य पुत्रस्य पुत्र्याः वा भवति। अमुस्मिन् संस्कारे पुत्रस्य कल्याणाय आयुर्विद्या-बल-वर्धनाय पिता कर्मकाण्डं करोति, भगवन्तञ्च प्रार्थयति।

ओ३म् इडासि मैत्रावरुणी वीरे वीरमजीजनथाः।
सा त्वं वीरवती भव[९] याऽस्मान्वीरवतोऽकरत्॥

हे स्त्रि! त्वं इडा स्तुत्या असि। त्वं मैत्रावरुणी असि। त्वं मैत्री सम्बन्धयोग्या असि। त्वं वरयितव्या असि। त्वं वीरपुत्रं वीराङ्गना-पुत्रीं वोत्पादयित्री असि। त्वं स्वयमेवापि वीरवती भव। वीरता-युक्तानि साहसिकानि कार्याणि कुरु। त्वं नारी असि। त्वमस्मानपि वीरान् भावय, निर्मापय। दयानन्दो लिखति-

'इस मन्त्र में ईश्वर की प्रार्थना करके प्रसूता स्त्री को प्रसन्न करके पश्चात् स्त्री के दोनों स्तन किञ्चित् उष्ण सुगन्धित जल से प्रक्षालन कर पोंछ के. .....बालक के मुख[१०] में देवे।'

परन्तु अद्यत्वे अत्याधुनिकाः नार्यः स्वदुग्धं न धापयन्ति, न पाययन्ति। परन्तु दयानन्दो लिखति सद्यो जाता माता यत् सद्यो जातं पुत्रं स्वकीयं स्तनस्थं दुग्धं स्तनन्धयमवश्यं पाययतु।

अद्यापि सुपरीक्षितमेतद् यत् माता यदि स्वकीयं पीतवर्णं स्वर्णिम-वर्णं दुग्धं पाययति, तदा सन्तानं स्वस्थम् आयुष्मद् बलवद् विद्वांश्च भवति।

विवाहसंस्कारप्रसंगे-

किदृशीं कन्यां नोद्वहेत् इति विषयमधिकृत्य मनुस्मृति-श्लोकान् समुद्धरति महर्षिदयानन्दः -

नोद्वहेत् कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम्।
नालोमिकां नातिलोमां न वाचाटां न पिङ्गलाम्॥
नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम्।
न पक्ष्यहिप्रेष्यनाम्नीं न च भीषणनामिकाम्॥
अत्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम्।
तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत्[११] स्त्रियम्॥

महर्षिदयानन्दो निर्दिशति-

'पीले वर्ण वाली, अधिक अङ्गवाली जैसे छंगुली आदि, रोमवती, जिसके शरीर पर कुछ भी लोम न हों और जिसके शरीर पर बड़े-बड़े लोम हों,

९. पारस्करगृह्यसूत्रम् १.१६.१९
१०. जातकर्मसंस्कारः, संस्कारविधिः
११. मनुस्मृतिः ३.८-१० श्लोकाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यर्थ अधिक बोलने हारी और जिसके पीले, बिल्ली के सदृश नेत्र हों तथा जिस कन्या का (ऋक्ष) नक्षत्र का नाम अर्थात रेवती, रोहिणी आदि, (नदी) जिसका गङ्गा, यमुना इत्यादि, (पर्वत) जिसका विन्ध्याचला इत्यादि, (पक्षी) अर्थात् कोकिला, हंसा, इत्यादि, (अहि) अर्थात् उरगा, भोगिनी इत्यादि, (प्रेष्य) दासी इत्यादि, (भीषण) कालिका, चण्डिका इत्यादि नाम हों, उनसे विवाह न करे।'[१२]

कया कन्यया सह विवाहः कर्त्तव्यः, इति विषये महर्षि-दयानन्दो लिखति-

'जिसके सुन्दर अङ्ग, उत्तम नाम, हंस और हस्तिनी के सदृश चाल वाली, जिसके सूक्ष्म लोम, सूक्ष्म केश और सूक्ष्म दाँत हों, जिसके सब अङ्ग कोमल हों, उस स्त्री से विवाह करे।'

यदि माता-पिता कन्या का विवाह करना चाहें, तो अति उत्कृष्ट शुभ गुण, कर्म, स्वभाव वाले, कन्या के सदृश रूप लावण्यादि गुण युक्त वर ही को चाहें। वह कन्या (वर की) माता की छः पीढ़ी के भीतर भी हो तथापि उसी को कन्या देना अन्य को कभी न देना कि जिससे दोनों अति प्रसन्न होकर गृहाश्रम की उन्नति और उत्तम सन्तानों की उत्पत्ति करें। चाहे मरणपर्यन्त कन्या पिता के घर में बिना विवाह के बैठी भी रहे परन्तु गुणहीन, असदृश, दुष्ट पुरुष के साथ कन्या का विवाह कभी न करे और वर भी अपने आप स्वसदृश कन्या के साथ ही विवाह करे।[१३]

ओ३म् भूर्भुवः स्वः अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः। वीरसूर्देवृकामा स्योना शन्नो भव द्विपदे शं चतुष्पदे ॥[१४]

परमात्मा प्राणदाता सर्वदुःखहर्त्ता सर्वसुखप्रदाता चास्ति। तस्य कृपया हे नारि! त्वं प्रियदर्शिनी भव। त्वं मङ्गलकारिणी भव। त्वं पशुभ्यः सुखदात्री भव। त्वं पवित्रान्तःकरणा भव। त्वं सुवर्चा सुन्दरशुभगुणकर्मस्वभावविद्यासु प्रकाशिता भव। वीरसूः त्वं वीरपुत्राणामुत्पादयित्री भव। त्वं स्योना सुखदा सुखकारिणी भव। त्वं सर्वमनुष्येभ्यः सर्वपशुभ्यश्च हितकारिणी परोपकारिणी च भव।[१५]

ओ३म् गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः। भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥[१६]

हे वरानने! अहं तव पतिः निजैश्वर्यसुसन्तानादिसौभाग्यवर्धापनाय तव हस्तं स्वहस्ते गृह्णामि। त्वं मया पत्या सह जरावस्था-पर्यन्तं निवस। तथैव पत्नी अपि वदति यत् हे मम रक्षकपते! अहं तव

१२. संस्कारविधिः, विवाहप्रकरणम्।
१३. संस्कारविधिः, विवाहप्रकरणम्।
१४. ऋग्वेदः १०.८५.४४
१५. संस्कारविधिः, विवाहप्रकरणम्।
१६. ऋग्वेदः १०.८५.३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्नी निजैश्वर्यसुसन्तानादिसौभाग्यप्रापणाय तव हस्तं स्वहस्ते दधामि। त्वं मया पत्न्या सह जरावस्था-पर्यन्तं निवस। अस्मिन् विवाहमण्डपे विराजमानाः सर्वे महाजनाः सज्जनाः ! भवन्तः आवां पाणिग्रहणसंस्कार-करणाय आदिशन्तु। न कदापि आवां परस्परस्य अन्योन्यस्य अप्रियाचरणं करिष्यावः।[१७]

ओ३म् भगस्ते हस्तमग्रभीत् सविता हस्तमग्रभीत्। पत्नी त्वमसि धर्मणाहं गृहपतिस्तव ॥[१८]

हे प्रिये! ऐश्वर्ययुक्तोऽहं तव पतिस्तव हस्तं गृह्णामि। सविता धर्ममार्गस्य प्रेरकोऽहं तव करं गृह्णामि। पत्नी त्वमसि धर्मणा त्वं धर्मेण मम पत्नी असि। अहमपि धर्मेण तव गृहपतिरस्मि। आवां मिलित्वैव गृहकार्याणि कुर्याव। यस्मादुत्तमसन्तानैश्वर्यसुखसौभाग्यादीनां सुवृद्धिः सदा भवेत्।[१९]

ममेयमस्तु पोष्या मह्यं त्वादाद् बृहस्पतिः ।
मया पत्या प्रजावति संजीव शरदः शतम् ॥[२०]

हे अनघे! हे निष्पापे! सर्वजगत्पालनकर्त्ता परमात्मा त्वां मह्यमदात्। अस्मिन् सर्वस्मिन् जगति त्वमेव मम पोष्या असि। अहं तव पतिः जीवनपर्यन्तं तव पालनं करिष्यामि। हे मम सन्तानोत्पादयित्रि! त्वं मया पत्या सह शतवर्षपर्यन्तं सुखपूर्वकं जीवनं धारय। एवमेव पत्नी अपि वदेत्। पत्नी पत्युः कल्याणं कुर्यात्। यावज्जीवनं दम्पती सहैवोषित्वा परिवारस्य राष्ट्रस्य च कल्याणं कुर्याताम्। पत्न्या पोष्यः पतिरपि अस्ति। अद्यत्वे नार्योऽपि कार्यं कृत्वा धनानि अर्जयन्ति।[२१]

ओ३म् आरोहेममश्मानमश्मेव त्वं स्थिरा भव ।
अभितिष्ठ पृतन्यतोऽवबाधस्व पृतनायतः ॥[२२]

हे नारि! हे पत्नि! त्वम् इमम् अश्मानम् आरोह। त्वम् अश्मा इव स्थिरा भव। त्वं प्रस्तरखण्डमिव दृढा भव। त्वं मम गृहे पूर्णरूपेण स्थिरतां प्राप्नुहि। त्वं स्वशत्रून् दुःखानि कष्टानि च दूरीकुरु। त्वं सकलदुःखहर्त्री भव।

सुमङ्गलीरियं वधूरिमां समेत पश्यत ।
सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतन ॥[२३]

अस्मिन् विवाहमण्डपे विराजमानाः महाशयाः ! मम वधूः सुमङ्गलीरस्ति। सदा सर्वदा मङ्गलकर्त्री अस्ति। सदा मम परिवारस्य कल्याणं करिष्यति। भवन्तः सर्वे इमां मम पत्नीं पश्यन्तु। अस्यै सौभाग्यस्य आशीर्वादं च ददतु। आशीर्वादं दत्वा भोजनं च कृत्वा यथास्थानं गच्छन्तु। इमं मन्त्रमुद्यार्य वध्वाः सीमन्ते सिन्दूर-दानं क्रियते।[२४]

गृहाश्रमप्रसंगे –

गृहाश्रमसंस्कारस्य माहात्म्यं व्याकुर्वन् दयानन्दो लिखति- 'गृहाश्रमसंस्कार उसको कहते हैं कि जो ऐहिक और पारलौकिक सुखप्राप्ति के लिए विवाह करके अपने सामर्थ्य के अनुसार परोपकार करना और नियतकाल में यथाविधि ईश्वरोपासना और गृहकृत्य करना और सत्यधर्म में ही अपना तन, मन, धन लगाना तथा धर्मानुसार सन्तानों की उत्पत्ति करनी।'[२५]

---

१७. विवाहप्रकरणम् (पाणिग्रहणप्रसंगे) संस्कारविधिः ।
१८. अथर्ववेदः १४.१.५१
१९. संस्कारविधिः, विवाहप्रकरणस्य पाणिग्रहणप्रसंगे ।
२०. अथर्ववेदः १४.१.५२
२१. संस्कारविधिः, विवाहप्रकरणस्य पाणिग्रहणप्रसंगे ।
२२. पारस्कर-गृह्यसूत्रम् १.७.१
२३. पारस्करगृह्यसूत्रम् १.८.९, ऋग्वेदः १०.८५.३३
२४. संस्कारविधिः, विवाहप्रकरणे ।
२५. संस्कारविधिः, गृहाश्रमसंस्कारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अमुष्मिन्नेव संस्कारे नारीमाहात्म्यं व्याख्यापयन् महर्षिः दयानन्दः वेदमन्त्रानुद्धृत्य लिखति-

सुमङ्गली प्रतरणी गृहाणां सुशेवा पत्ये श्वसुराय शम्भूः।
स्योना श्वश्र्वै प्रगृहान् विशेमान्॥[२६]
स्योना भव श्वशुरेभ्यः स्योना पत्ये गृहेभ्यः।
स्योनास्यै सर्वस्यै विश्वे स्योना पुष्टायेषां भव॥[२७]
इहेमाविन्द्र सं नुद चक्रवाकेव दम्पती।
प्रजयैनौ स्वस्तकौ विश्वमायुर्व्यश्नुताम्॥[२८]
प्रबुध्यस्व सुबुधा बुध्यमाना दीर्घायुत्वाय शतशारदाय। गृहान् गच्छ गृहपत्नी यथासो दीर्घं त आयुः सविता कृणोतु॥[२९]
अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः।
जाया पत्ये मधुमतीं वाचं वदतु शन्तिवाम्॥[३०]

महर्षिदयानन्दस्य नारी सुमङ्गली मङ्गलकारिणी, प्रतरणी दुःखेभ्य तारिणी, स्वपत्ये सुशेवा सुखदा, श्वसुराय शान्तिदायिनी, श्वश्र्वै सुखकारिणी, सम्पूर्णगृहजनेभ्यश्च कल्याणकारिणी अस्ति। दम्पती पत्नीपती प्रीत्या गृहे निवसेताम्। चक्रवाकेव परस्परं प्रीतिं कुर्याताम्। सविता परमात्मा ते आयुः दीर्घं कृणोतु। जाया स्वपत्ये मधुमतीं शान्तियुतां वाचं वदतु। येन गृहे सुखस्य आनन्दस्य च वृद्धिर्भवेत्।

उपसंहारः -

विवाहसंस्कारः एकस्मिन् काले द्वयोरेव भवति। विशिष्टरूपेण गृहस्थधर्मस्य पालनं क्रियते। अमुस्मिन्

हरिद्वार-स्थितस्य ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य मुखपत्रम्
भारतोदयः (संस्कृत-मासिकम्)
P.O. गुरुकुलकाङ्गड़ी २४९४०४
हरिद्वारम् (उत्तराखण्डम्)
सेवायाम्,
श्री.....

पञ्चयज्ञाः क्रियन्ते। विवाहसंस्कारे सप्तपदीमाध्यमेन जीवनस्योद्देश्यं निर्दिश्यते। विवाहसंस्कार-माध्यमेन कामेच्छा परिपूर्यते। सृष्टिवाहनमपि परिचाल्यते। सम्बन्धिनां संख्या अपरिमिता जायते। अतिथीनामागमनं प्राचुर्येण भवति। अनेन संस्कारेण गृहाश्रमे प्रविश्यते। धन्यो गृहस्थाश्रमः। गृहाश्रमः एतादृशः मोदक अस्ति, यो खादेत् स पश्चात्तापं कुर्यात्, यो न खादेत्, सोऽपि पश्चात्तापं कुर्यात्। अतः गृहस्थाश्रमरूपमोदकं भुक्त्वैव पश्चात्तापं कुर्यात्। धन्यो गृहस्थाश्रमः, यो हि सर्वान् जन्तून् भोजयति पालयति च।

२६. अथर्ववेदः १४.२.२६
२७. अथर्ववेदः १४.२.२७
२८. अथर्ववेदः १४.२.६४
२९. अथर्ववेदः १४.२.७५
३०. अथर्ववेदः ३.३०.२

मुद्रकेण, प्रकाशकेन डॉ. हरिगोपालशास्त्रिणा ज्वालापुर-स्थिते 'न्यू जे.एन. स्टेशनरी मार्ट' नामके मुद्रणालये मुद्रापयित्वा 'भारतोदयः' मासिकं पत्रं प्राकाश्यं नीतं हरिद्वार-स्थितया ज्वालापुरीय-गुरुकुलमहाविद्यालय-सभया।
सम्पादकः डॉ. हरिगोपालशास्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu